# A-II/1/2390/ 21

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. आप्तमीमांसेति पदस्य तात्पर्यविशेषः कः?
2. कोऽस्ति अस्य आप्तमीमांसाग्रन्थस्य रचनाकारः?
3. आप्तमीमांसाग्रन्थः कस्मिन् काले सूरिणा विरचितः?
4. के द्वे प्रमुखे संस्कृतटीके आप्तमीमांसायाः वर्तेते?
5. पाठ्यग्रन्थोऽयं केन नाम्ना लोके प्रचलितः?
6. "नातस्त्वमसि नो महान्" इत्युक्त्वा किं प्ररूपितम्?
7. सर्वेषामाप्तता नास्ति कश्चिदेव भवेद् गुरुः? इत्यस्य कोऽर्थः?
8. "सदैव सर्वं को नेच्छेत्स्वरूपादिचतुष्टयम्" इत्यस्य को भावः?
9. "बोधवाक्यं प्रमाणं न केन साधनदूषणम्" इति स्पष्टयत?
10. कुशलाकुशलकर्माणि कानि?
11. "विग्रहादिमहोदयः" कथं भवति आप्तस्य? कुतश्च तेनैव नास्ति आप्तता?

**अथवा**

"सर्वात्मकं तदेकं स्यादन्यापोहव्यतिक्रमे" इति वचनं स्पष्टयत।

12. 'नित्यत्वेकान्ते' के प्रमुखदोषाः? निर्दिश्यन्ताम्।

**अथवा**

क्षणिकैकान्ते विद्यमानदोषान् प्रतिपादयत?

13. "शोकप्रमोदमाध्यस्थं जनो याति सहेतुकम्" इति कथमुक्तं ग्रन्थकारेण?

**अथवा**

"न तौ जात्याद्यवस्थानादनपेक्षाः खपुष्पवत्" इति वचनं स्पष्टयत।

14. "धर्मधर्म्यविनाभाव: सिद्ध्यति अन्योऽन्यवीक्षया" इत्यस्य कोऽर्थ:?

**अथवा**

"आप्ते वक्तरि तद्वाक्यात्साध्यभागमसाधितम्" इत्यस्यार्थो विधेय:।

15. "अज्ञानान्मोहिनो बन्धो नाज्ञानाद्वीतमोहत:" इति वचनं स्पष्टयत।

**अथवा**

"स्याद्वाद: सर्वथैकान्तत्यागात् किंवृत्तचिद्विधि:" इत्यस्य कोऽर्थ:?

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** **(5×6=30)**

16. पाठ्यग्रन्थदिशा स्याद्वाद: विमर्शणीय:।

17. अद्वैतैकान्तवाद: पाठ्यग्रन्थदिशा समीक्षणीय:।

18. मिथ्यासमूहो मिथ्या चेन्न मिथ्यैकान्तताऽस्ति न:।
निरपेक्षा नया मिथ्या सापेक्षा वस्तु तेऽर्थकृत्॥
–इत्यस्य कोऽर्थ:? स्पष्टयत।

**अथवा**

"नयोपनयैकान्तानां त्रिकालानां समुच्चय:।
अविभ्राट् भावसम्बन्धो द्रव्यमेकमनेकधा॥"
–इत्यस्य भावार्थ: लेख्य:?

19. अद्वैतैकान्तपक्ष: पूर्वापरपक्षपुरस्सरं समीक्षणीय:।

**अथवा**

भावैकान्तपक्षे के दोषा: प्ररूपिता:? कथञ्च ते प्रक्षालयितुं शक्या:? ग्रन्थप्रमेयानुगुणं स्पष्टं लिखत।

20. स्याद्वादस्य विवेचना पाठ्यग्रन्थदिशा विधेया।

**अथवा**

'सामान्यं समवायश्चाप्येकैकत्र समाप्तित:।
अन्तरेणाश्रयं न स्यान्नाशोत्पादिषु को विधि:॥'
इति कारिकां सप्रसङ्गं व्याख्यात।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. पाठ्यग्रन्थदिशा सर्वज्ञसिद्धिः।

**अथवा**

अभावस्वभावविमर्शः।

**अथवा**

पाठ्यग्रन्थस्य दार्शनिकक्षेत्रे योगदानम्।

# A-II/2/2391/ 21

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. "समयसारः" इत्यस्य प्राकृतरूपं निर्दिशत।
2. समयसारस्य रचनाकारः जैनाचार्यपरम्परायां कीदृशं स्थानं भजते?
3. नवपदार्थाः के?
4. पदार्थव्यवस्थायां कर्तृकर्मत्वस्य किं स्थानम्?
5. आत्मपदार्थे किं कर्तृ किञ्च कर्म भवति?
6. अज्ञानी जीवः क्रोधादिषु वर्तते कथम्?
7. कर्तृकर्मत्वनिरूपणं यथार्थनयदिशा पदार्थेषु यथा भवति तथा लिखत।
8. आचार्यकुन्दकुन्देन नवतत्त्वनिरूपणे कर्तृकर्मत्वोपदेशः कथं प्रदत्तः?
9. कथमिव आत्मा कर्मणां कर्त्ता नास्ति? स्पष्टं लिखत।
10. जीवेन सह कर्माणि कथं सन्ति बद्धस्पृष्टानि अबद्धस्पृष्टानि वा?
11. जीवपरिणामहेदुं कम्मत्तं पुग्गलां परिणमंति इति वाक्यस्य कः भावः?

**अथवा**

"णवि कुव्वइ कम्मगुणे जीवो कम्मं तदेव जीवगुणे" इत्यस्य कोऽर्थः?

12. "ववहारस्स दु भादा पुग्गलकम्मं करेदि णेयविहं" इत्यस्य संस्कृतानुवादः कः?

**अथवा**

"तं चेव पुणो वेयइ पुग्गलकम्भं अणेयविहं" इत्यस्य संस्कृतेऽनुवादः कार्यः?

13. "तिविहो एसुवओगो" इति कथं वक्ति ग्रन्थकारः?

**अथवा**

केनोपयोगेन आत्मा क्रोधादिभावानां कर्त्ता भवति?

14. आत्मा पुद्गलकर्मणां कर्त्ता अस्ति न वा कुतः स्पष्टयत।

**अथवा**

द्रव्यस्वभावं कश्चन परिवर्तयितुं शक्नोति नैवेति कथम्?

15. "जं कुणदि भावमादा कत्ता सो होदि तस्स भावस्स" इत्यस्य कोऽर्थः?

**अथवा**

"णाणिस्स सणाणमओ अण्णामओ अणाणिस्स" इत्यस्य भावार्थः प्रज्ञापनीयः।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "सव्वणयपक्खरहिदो भणिदो जो सो समयसारो" इति वाक्यार्थः प्रदर्शनीयः।

17. गाथेयं व्याख्येया -

"जं जीवेण सहच्चिय पुग्गलदव्वस्स कम्मपरिणामो।

एवं पुग्गलजीवा हु दो वि कम्मत्तमावण्णा॥"

18. कथं ज्ञानास्रवयोः निवृत्तिः जायते? ग्रन्थदिशा स्पष्टयत।

**अथवा**

ण वि परिणमदि ण गिण्हदि उप्पज्जदि ण परदव्वपज्जाए।

णाणी जणंतो वि हु सगपरिणामं अणेय विहं॥ इति गाथा विशदनीया।

19. कर्तृकर्माधिकारे जीवः कथं हि ज्ञानीभूतो लक्ष्यते? व्याख्यात।

**अथवा**

"व्याप्यव्यापकभावसम्भवमृते का कर्तृकर्मस्थितिः" इत्यस्य विशदार्थो लेख्यः।

20. एक एव श्लोकः सप्रसङ्गं व्याख्येयः -

"यः परिणमति स कर्त्ता य परिणामो भवेत्तु तत्कर्म।

या परिणतिः क्रिया सा त्रयमपि भिन्नं न वस्तुतया॥"

**अथवा**

"नैकस्य हि कर्त्तारौ द्वौ स्तो द्वे कर्मणो न चैकस्य।

नैकस्य च क्रिये द्वे एकमनेकं यतो न स्यात्॥"

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. समयसारग्रन्थदिशा कर्तृकर्मविवेचना

**अथवा**

मोक्षपुरुषार्थदिशा समयसारस्य उपदेशः

**अथवा**

आचार्यकुन्दकुन्दस्य दार्शनिकमवदानम्

# A-II/3/2392/ 21

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. 'उत्तराध्ययनसूत्रम्' इत्यनेन किमभिधीयते?
2. 'संजोगा विप्पमुक्कस्स' इत्यनेन किं प्रोक्तम्?
3. दु:शीलस्य क: स्वभाव:?
4. विनीतशिष्य: कीदृशो भवति?
5. अविनीतशिष्य: कीदृशो भवति?
6. 'विणए ठवेज्ज अप्पाणं इच्छंतो हियमप्पणो' इति वचनेन किमुक्तम्?
7. 'अप्पा दंतो सुही होइ' इत्यनेन किं तात्पर्यम्?
8. वचनविनयेन किं प्रयोजनम्?
9. चारित्रविनयेन किं तात्पर्यम्?
10. 'मियं कालेण भक्खए' इत्यनेन किमुक्तम्?
11. एषणासमिति: का?

**अथवा**

विनयभावेन को लाभ:?

12. परीषहा: कति सन्ति?

**अथवा**

परीषहस्य किं लक्षणमुक्तम्?

13. 'अन्नाणपरीसहे' इत्यनेन किं तात्पर्यम्?

**अथवा**

'संगो एस मणुस्साणं जाओ लोगंमि इत्थिओ' इत्यनेन किं प्रयोजनम्?

14. 'पडिसंजले' इत्यनेन किं तात्पर्यम् ?

**अथवा**

चत्वारि परमाङ्गानि दुर्लभानि कानि ? नामानि लिखत।

15. प्रमादस्य कति भेदाः उक्ताः ?

**अथवा**

'मायं न सेवे पयहेज्ज लोहं' इत्यनेन किं प्रयोजनम् ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अणुसासिओ न कुप्पेज्जा खंतिं सेविज्ज पंडिए। खुड्डेहिं सह संसग्गिं हासं कीडं च वज्जए॥
इति विनयसूत्रं विवेचयत।

17. 'विणयसुयं' इति पाठस्य महत्त्वं प्रतिपाद्यं च प्रतिपादयत।

18. चरंतं विरयं लूहं सीयं फुसइ एगया। नाइवेलं मुणी गच्छे सोच्चा णं जिणसासणं॥
इति परीषहसूत्रं विवेचयत।

**अथवा**

परीषहाः संक्षेपेण विवेचयत।

19. 'चतुरङ्गीय' अध्ययनस्य प्रमुखं प्रतिपाद्यं लेखनीयम्।

**अथवा**

कम्माणं तु पहाणाए आणुपुव्वी कयाइ उ। जीवा सोहिमणुप्पत्ता आययंति मणुस्सयं॥
इति मनुष्यसूत्रं स्पष्टयत।

20. 'असंखयं' इति अध्ययनस्य महत्त्वं प्रतिपादयत।

**अथवा**

प्रमादस्य प्रकाराः दोषाश्च प्रतिपादनीयाः।

**स. कयोश्चिद् द्वयोः प्रश्नयोः उत्तरं देयम्।** **(2×10=20)**

21. 'आकमभरणिज्जं' इति अध्ययनस्य प्रतिपाद्यं स्पष्टयत।

22. ग्रन्थोक्तदिशा मरणप्रकाराः विवेचनीयाः।

**अथवा**

उत्तराध्ययनस्य सोदाहरणं महत्त्वं प्रतिपादयत।

# A-II/4/2393/ 21

## चतुर्थसत्रार्द्धम्

## चतुर्थपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. परमात्मप्रकाशस्य मङ्गलाचरणे के के देवाः वन्दिताः?
2. के भवबीजाङ्कुरं जनयन्ति?
3. कथं बहिरात्मा मृत्योः विभेति?
4. आत्मभेदं लिखत।
5. शरीरादौ कः आत्मा निवसति?
6. मूढः कं परस्यात्मा इति मन्यते?
7. अभयस्थानं किमिति ग्रन्थदिशा लिखत।
8. इन्द्रियज्ञानजन्याः पदार्थाः अचेतनाः इति कः चिन्तयति?
9. कः कारणं विना अपि समेषां रक्षां करोति?
10. सज्जनाः केन प्रकारेण जगतः रक्षां कुर्वन्ति?
11. धर्मस्य के आधाराः?

**अथवा**

धर्मः काभ्यां वृद्धिं याति?

12. कः इह-परलोकयोः विनाशं करोति?

**अथवा**

शमस्य अभ्यासः कयोः साहाय्येन क्रियते?

13. कीदृशं मनः अकीर्तिं जनयति?

**अथवा**

मुक्तिमार्गे कीदृशः जनः स्वप्नेऽपि स्थातुं न शक्नोति?

14. कः बकवृत्तेरालम्बनं करोति?

**अथवा**

कः जनः स्वामि-गुरु-बृद्ध-बालान् अपि हन्ति?

15. अहिंसकोऽपि जनः कथं परेषां हिंसायाः फलं प्राप्नोति?

**अथवा**

कामसर्पभयात् संयमी कीदृशस्य गरूडस्य शरणं याति?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. बहिरात्मनः स्वरूपं प्रतिपादयत।

17. पश्येन्निरन्तरं देहमात्मनोऽनात्म-चेतसा।

अपरात्मधियाऽन्येषामात्म-तत्त्वे व्यवस्थितः॥

-व्याख्यां कुरुत।

18. अन्तरात्मनः स्वरूपं प्रतिपादयत।

**अथवा**

असत्यस्वरूपं लिखत।

19. हिंसायाः स्वरूपं प्रतिपादयत।

**अथवा**

लोभस्य परिणामं प्रतिपादयत।

20. क्रोधस्य स्वरूपं स्वभाषया लिखत।

**अथवा**

मायायाः स्वरूपं लिखत।

**स. दीर्घोत्तरेण प्रश्नः समाधेयः।** **(1×20=20)**

21. कोपः कथमन्धकारः, अग्निः ग्रहश्च विशदयत।

**अथवा**

धर्मस्वरूपं विशदयत।

**अथवा**

ग्रन्थस्य मङ्गलाचरणं व्याख्यात।

# A-II/5/2394/21

## चतुर्थसत्रार्द्धम्

## पञ्चमपत्रम्

## जैनदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. "जैन:" इत्यस्य किं तात्पर्यम्?
2. धर्मस्य उद्देश्यं किम्?
3. दर्शनस्य मुख्यस्वरूपं किम्?
4. संस्कृते: तात्पर्यं किम्?
5. दर्शनस्य मुख्यभेदान् लिखत।
6. आगमस्य स्वरूपं किम्?
7. अङ्गानि कानि?
8. अहिंसाया: स्वरूपं किम्?
9. व्रतस्य परिभाषां लिखत।
10. अपरिग्रहस्य स्वरूपं किम्?

**अथवा**

समिते: स्वरूपं लिखत।

11. गुप्ते: स्वरूपं लिखत।

**अथवा**

गुणस्थानस्य स्वरूपं किम्?

12. सम्यग्दर्शनस्य स्वरूपं लिखत।

**अथवा**

श्रावकस्य स्वरूपं लिखत।

13. वीतरागस्य स्वरूपं किम्?

**अथवा**

पूजायाः अष्टाङ्गानां नामानि लिखत।

14. मिथ्यात्वस्य स्वरूपं लिखत।

**अथवा**

जैनदर्शने गुरोः स्वरूपं किम्?

15. नवदेवतायाः नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. तीर्थङ्कराणां नामानि लिखित्वा परिभाषां लिखत।

17. गुणस्थानानां नामानि स्वरूपं च स्पष्टयत।

**अथवा**

अणुव्रतोपरि टिप्पणीं लिखत।

18. आगमवाचनायाः स्वरूपं स्पष्टीक्रियताम्।

**अथवा**

अष्टाङ्गसम्यग्दर्शनस्य स्वरूपं प्रतिपादयत।

19. श्रावकस्य मूलगुणोपरि टिप्पणीं लिखत।

**अथवा**

मोक्षमार्गस्य स्वरूपं स्पष्टीक्रियताम्।

20. जैनागमसाहित्यस्य स्वरूपं लिखत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. जैनजीवनशैल्याः विस्तृतविवेचनं कुरुत।

**अथवा**

"पर्यावरणसंरक्षणं तथा जैनदर्शनम्" इति विषयमधिकृत्य निबन्धं लिखत।